चौधरीचरणसिंहविश्वविद्यालयः मेरठम् (उ0प्र0) भारतम्

राष्ट्रिय–मूल्याङ्कन–प्रत्यायन–परिषदा (NAAC द्वारा) सर्वोच्चश्रेण्या (A++) प्रत्यायितः)

अत्रत्येन संस्कृतविभागेन देहलीस्थस्य केन्द्रीय–संस्कृत–विश्वविद्यालयस्यानुदानेनायोज्यते

राष्ट्रियव्याससमारोहः 2026

कार्तिके यमद्वितीयातोऽष्टमीं यावत् 2083 (11 नवम्बरतः 17 नवम्बरं यावत् 2026)

सम्मान्याः कुलपतयः/अध्यक्षाः संस्कृतविभागस्य/प्राचार्याः/प्राध्यापकाः/महोदयाः

विदितं भवतु यद्यथापूर्वमत्र प्रचरिष्यति उपरिलिखितासु तिथिषु व्याससमारोहः ।
निवेद्यते यद् भवन्तः प्रतिवर्षमिव स्वयं स्वदलेन शोधपत्रेण स्वकथया कविताभिर्वा
सहागत्य अस्मान् कृतार्थयन्तु प्रतिनिधिं वा प्रेषयन्तु ।

अत्र व्याससमारोहे कार्यक्रमः संस्कृतविभागे –

11.11.2026	10:00	वादनवेलातः	शोभायात्रा यज्ञश्च
	03:00	वादनवेलातः	उद्घाटनोत्सवः/सामवेदकथा/संस्कृतसम्भाषण–प्रशिक्षणम्
12.11.2026	10:00	वादनवेलातः	अन्तर्महाविद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः
	02:00	वादनवेलातः	सामवेदकथा/सामगानम्/यौगिकबलप्रदर्शनस्य प्रतियोगिता
	05:30	वादनवेलातः	संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
13.11.2026	10:00	वादनवेलातः	अन्तर्विद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः
	02:00	वादनवेलातः	सांस्कृतिककार्यक्रमाः
	05:30	वादनवेलातः	संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
14.11.2026	10:00	वादनवेलातः	कालीचरणपौराणिकस्मृतिव्याख्यानम्
	02:00	वादनवेलातः	शोधसङ्गोष्ठी (सामवेदे विविधविद्याः)
	05:30	वादनवेलातः	संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
15.11.2026	10:00	वादनवेलातः	अन्तर्विश्वविद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः
	02:00	वादनवेलातः	शोधसङ्गोष्ठी (सामवेदे विविधविद्याः)
	05:30	वादनवेलातः	संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
16.11.2026	08:00	वादनवेलातः	गढमुक्तेश्वरयात्रा/सामवेदकथा/संस्कृतसम्भाषण–प्रशिक्षणम्
17.11.2026	10:00	वादनवेलातः	समापनोत्सवः (पुरस्कारादिवितरणम्)

अत्रभवन्तः सादरमाहूयन्ते । तत्र नियमाः

1. **संस्कृतवादविवादप्रतियोगिता** विषयः– **गावो वत्सं न धेनवः। (सामवेदे पूर्वार्चिके 2.2.4)**
   प्रतिसंस्थं पक्षं विपक्षं चाश्रित्य द्वौ छात्रौ प्रवेशार्हौ । प्रतिप्रतियोगिपञ्चमिनटात्मकः कालावधिः ।
   विजेतृभ्यः प्रथमद्वितीयतृतीयपुरस्काराः पदकादिरूपाः अथ च श्रेष्ठसंस्थाकृते चलवैजयन्ती अस्ति।
   धर्मेन्द्रमणिनाम्ना पुरस्कारौ अपि दीयमानौ स्तः ।
2. **संस्कृतप्रश्नमञ्चः** –प्रतिसंस्थं द्वौ छात्रौ प्रवेशार्हौ । संस्कृतप्रश्नमञ्चे प्रश्नाः विद्यालय–महाविद्यालय–विश्वविद्यालयस्तरस्य पाठ्यक्रमाद् भविष्यन्ति।
   विजेतृभ्यः प्रथमद्वितीयतृतीयपुरस्काराः पदकादिरूपाः अथ च श्रेष्ठसंस्थाकृते चलवैजयन्ती अस्ति।
3. **वैदिकशोधसङ्गोष्ठी** –विषयः– **सामवेदे विविधविद्याः।** सम्पादकमण्डलस्य स्वीकृतिं विना किमपि शोधपत्रं प्रस्तोतुं न शक्यते । ऐषमः सामवेदमाश्रित्य सङ्गोष्ठ्यः चरिष्यन्ति । शोधपत्रमनिवार्यतया संस्कृतेन भवतु।
4. **संस्कृतकविसमवायः** –प्रतिदिनं सन्ध्याकाले भविष्यति। तत्र निर्बाधकविताप्रवाहो भविष्यति। श्रेष्ठकविः चलव्यासवैजयन्त्या सम्मानितो भविष्यति। चलव्यासवैजयन्त्या व्यासध्वजेन सह एकसहस्ररूप्यकाण्यपि सन्ति ।
5. **संस्कृतसम्भाषण–प्रशिक्षणम्** –प्रतिदिनं सन्ध्याकाले भविष्यति। भागग्रहीतृभ्यः संस्कृतसम्भाषणस्य प्रशिक्षणं तदनु च प्रमाणपत्रमपि प्रदास्यते।
6. सर्वेषु कार्यक्रमेषु –भागग्रहणसूचनाकृते शोधपत्रप्रेषणकृते चान्तिमा तिथिः **08.11.2026** विद्यते ।
7. भोजनावासव्यवस्था –मार्गादिव्ययस्य व्यवस्था स्वस्वसंस्थातः स्वयं वा करणीया । स्वीकृते शोधपत्रे यथाव्यवस्थमारक्षितश्रेणीकमार्गव्ययस्यापि व्यवस्था भवितुं शक्नोति । अतः पूर्वमेव सूचनादिकं प्रेषणीयम् ।

मेरठनगरं हि भारतवर्षे उत्तरप्रदेशे दिल्लीनगरतः प्रायः 70 किलोमीटरदूरं नमोभारत–भारतीयरेल–बसमार्गैः सुसम्बद्धं मध्येगंगायमुनं प्रसिद्धमैतिहासिकं नगरम् । आगमनादिसूचनायां पूर्वप्राप्तायां मोदावहो निवासोऽत्रभवतां भवितेत्याशासे । एतादृशाः कार्यक्रमाः भवादृशां विदुषां सहयोगेनैव सफला भवन्तीति । निवेद्यते यद् भवन्त इन्द्रप्रस्थहस्तिनापुरयोरन्तराले व्यासक्रीडाभूमिपरिसरे मेरठनगरमवश्यमेवागच्छन्तु। अथ च स्वस्वविश्वविद्यालयेभ्यो महाविद्यालयेभ्यो विद्यालयेभ्यो वा प्रतियोगिच्छात्रदलं सांस्कृतिकदलमध्यापकं वा प्रतिनिधिरूपेण प्रेषयन्तु स्वयं च/वा आगत्य कृतार्थयन्तु । इति।

सम्पर्कस्थानम् – डॉ0 सुधाकराचार्यः त्रिपाठी (सम्मानिताचार्यः विभागाध्यक्षचरश्च)
डॉ0 पूनमलखनपालः (मार्गदर्शिका संयोजयित्रीचरी च)
डॉ0 प्रशान्तः शर्मा – 8882499927 (संयोजकः व्याससमारोहस्य सह–विभागाध्यक्षश्च संस्कृतविभागस्य)
डॉ0 नरेन्द्रकुमारः – 9319780777 (सहसंयोजकः संयोजकचरश्च व्याससमारोहस्य)
डॉ0 ओमपालसिंहः – 9837417069 (सहसंयोजकः व्याससमारोहस्य)
डॉ0 सन्तोषकुमारी – 8439720212, 9359510111 (संयोजयित्रीचरी व्याससमारोहस्य)
E-mail: vyasasamarohah1992@gmail.com | sanskritvibhagccsu@gmail.com

भवतां

संयोजकः